# Shri Dattatreya Anushtup Mantravidhanam

# શ્રીદત્તાત્રેયાનુષ્ટુપ્મન્ત્રવિધાનમ્

## Document Information

Text title : Shri Dattatreya Anushtup Mantravidhanam

File name : dattAtreyAnuShTupmantravidhAnam.itx

Category : deities_misc, dattAtreya, mantra

Location : doc_deities_misc

Author : Traditional

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Description-comments : From various sources

Latest update : June 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 23, 2026

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયાનુષ્ટુપ્મન્ત્રવિધાનમ્

વિનિયોગઃ -
ૐ અસ્ય શ્રીદત્તાત્રેયાનુષ્ટુપ્મન્ત્રસ્ય ભગવાન્ શિવ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । ષડ્ભુજઃ શ્રીદત્તાત્રેયો દેવતા ।
તત્પ્રીત્યર્થે જપે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ ।
ભગવતે શિવઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
ષડ્ભુજશ્રીદત્તાત્રેયદેવતાયૈ નમઃ હૃદિ ।
તત્પ્રીત્યર્થે જપે વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

કરન્યાસઃ ।
દત્તાત્રેય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
હરે કૃષ્ણ તર્જનીભ્યાં સ્વાહા ।
ઉન્મત્તાનન્દદાયક મધ્યમાભ્યાં વષટ્ ।
દિગમ્બર મુને અનામિકાભ્યાં હુમ્ ।
બાલ પિશાચ કનિષ્ઠિકાભ્યાં વૌષટ્ ।
જ્ઞાનસાગર કરતલકરપૃષ્ઠાભ્યાં ફટ્ ॥

ષડઙ્ગન્યાસઃ ।
દત્તાત્રેય હૃદયાય નમઃ ।
હરે કૃષ્ણ શિરસે સ્વાહા ।
ઉન્મત્તાનન્દદાયક શિખાયૈ વષટ્ ।
દિગમ્બર મુને કવચાય હુમ્ ।
બાલ પિશાચ નેત્રત્રયાય વૌષટ્ ।
જ્ઞાનસાગર અસ્ત્રાય ફટ્ ॥

ધ્યાનમ્ -

સદાનન્દાત્મકં શુદ્ધં સાત્ત્વિકં તારકં પરમ્ ।
વિશ્વરૂપં જગદ્યોનિં દત્તાત્રેયં ભજામ્યહમ્ ॥

ષડ્ભુજં વરદં શાન્તં દિગમ્બરમનામયમ્ ।
બાલોન્મત્તપિશાચાર્થં યોગિનાં હૃદિ સંસ્થિતમ્ ॥

જ્ઞાનસાગરમત્યુગ્રં ભક્તાનુગ્રહકારકમ્ ।
અવધૂતં મહાયોગિં દત્તાત્રેયં નમામ્યહમ્ ॥

મૂલમન્ત્રજપઃ ।
દત્તાત્રેય હરે કૃષ્ણ ઉન્મત્તાનન્દદાયક ।
દિગમ્બર મુને બાલ પિશાચ જ્ઞાનસાગર ॥

॥ ઇતિ શ્રીદત્તાત્રેયાનુષ્ટુપ્મન્ત્રવિધાનં સમ્પૂર્ણમ્ ॥

Those who do not have a physical guru should practice Dattatreya Upasana.

Encoded and proofread by Durga Sharma

---

*Shri Dattatreya Anushtup Mantravidhanam*
pdf was typeset on June 23, 2026

Please send corrections to *sanskrit@cheerful.com*